**शाल्** 1 A. ( शालते ) 1 To praise, flatter. -2 To shine. -3 To be endowed with; Malli. on Ki. 5. 44. -4 To tell. -5 To boast, vaunt.

**शाल** *a*. Telling, boasting. -2 Sounding; सशालभिन्दिपलाश्च Mb. 5. 155. 6 (com. शालते कथते शब्दं करोतीति शालः ).

**शालः** 1 N. of a tree (very tall and stately), Shorea Robusta; 'शालः सर्जतरुः स्मृतः' इति शाश्वतः; शालनिर्याससगन्धिभिः R. 1. 38; Śi. 3. 40; Ki. 10. 34. -2 A tree in general; शालप्रांशुर्महाभुजः R. 1. 13; Ve. 4. 3; घनपोत्रविदीर्णशालमूलः Ki. 13. 3. -3 An enclosure, a fence. -4 A kind of fish. -5 N. of king Śālivāhana. **-Comp.** **-ग्रामः** a kind of sacred stone said to be typical of Viṣṇu, as the Phallus is of Śiva. °गिरि N. of a mountain. °शिला the *Śālgrama* stone. **-जः, -निर्यासः** exudation of the Śāla tree, resin; R. 1. 38. **-पोतः** a young Śāla tree. **-भञ्जिका** 1 a doll, puppet, statue; Vb. 1; N. 2. 83; रचिता तोरणशालभञ्जिकेव Bu. Ch. 5. 52. -2 a courtezan, harlot. **-भञ्जी** a doll, puppet. **-वेष्टः** the resin of the Śāla tree; cf. सालः. **-सारः** 1 a superior tree. -2 asa foetida.

**शालकः** A jester, buffoon.

**शालकायनः** N. of a ṛiṣi.

**शालङ्कायनजीवसू** *f*. Vyāsa's mother.

**शालङ्किः** *m*. N. of Pāṇini.

**शालवः** The *Lodhra* tree.

**शाला** [ शाल्-अच् ] 1 An apartment, a room, saloon, hall; न तत्र च आरामविहारार्थाः शालाः स्युः Kau. A. 2. 1; गृहैर्विशालैरपि भूरिशालैः Śi. 3. 50; so संगीतशाला, रङ्गशाला &c.; निजमधिरुह्य विलोकनीयशालम् Śiva B. 26. 78. -2 A house, an abode; तस्यान्त इह भूयास्म महाशाला महाकुलाः। -3 The upper or main branch of a tree. -4 The trunk of a tree. -5 A stable, stall; as in वाजिशाला, गर्दभशाला &c.; शालाविधिस्तम्भगतैश्च नागैः R. 16. 41. -6 A pavilion erected for making gifts; Dānasāgara, Bibl. Ind. 274, Fasc. 1. p. 146. **-Comp.** **-अजिरः, -रम्** a hollow earthen cup. **-मुखम्** the front of a house. (**-खः**) a kind of rice. **-मृगः** a jackal. **-वृकः** 1 a dog; सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः Bv. 1. 72. -2 a wolf. -3 a deer. -4 a cat. -5 a jackal. -6 a monkey. **-सद्** *a*. one who stays at home; शालासदां प्रजानाम् Ait. Br. 1. 14.

**शालाकिन्** *m*. 1 A lancer, spear-man. -2 A surgeon. -3 A barber.

**शालाङ्की** *f*. A doll.

**शालाक्यम्** A branch of surgery. **-क्यः** An occulist who uses sharp instruments. **-Comp.-शास्त्रम्** the science of using sharp instruments for diseases.

**शालातुरीयः** An epithet of Pāṇini (written also शालोत्तरीय; so called from शलातुर the place of his birth).

**शालारम्** 1 A flight of steps, ladder. -2 A bird-cage. -3 The claw of an elephant.

**शालिः** 1 Rice; न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते Mu. 1.3; यवाः प्रकीर्णा न भवन्ति शालयः Mk. 4. 17. -2 The civet-cat. **-Comp.** **-ओदनः, -नम्** boiled rice (of a superior kind). **-कूटम्** a heap of rice. **-केदारः** a rice field. **-गोपी** a female appointed to watch a rice field; इक्षुच्छायनिषादिन्यः शालिगोप्यो जगुर्यशः R. 4. 20. **-ग्रामः** (s. v. शालग्रामः above); शालिग्रामशिलानां च दानानां च निरूपणम् Brav. P. ब्रह्मखण्ड 1. 28. **-चूर्णः, -र्णम्** rice-flour. **-पिष्टम्** a crystal. **-भवनम्** a rice-field. **-वाहः** an ox used for carrying rice. **-वाहनः** N. of a celebrated sovereign of India whose era commences with 78 A. D. **-शूकः** an awn or beard of rice. **-होत्रः** 1 N. of a writer on veterinary subjects. -2 a horse. (**-त्रम्**) Śālihotra's work on veterinary science. **-होत्रिन्** *m*. a horse.

**शालिकः** 1 A weaver. -2 A toll, tax. -3 A village of artisans.

**शालिन्** *a*. (**-नी** *f*.) (usually at the end of comp.) 1 Endowed with, possessed of, possessing, shining or resplendent with; अलघूपलपङ्क्तिशालिनीः परितो रुद्धनिरन्तराम्बराः Śi. 16. 76; Ki. 2. 31; 7. 28, 55; 8. 17; विलासिनीनां स्तनशालिनीनामलंक्रियन्ते स्तनमण्डलानि Ṛs. 4. 2. -2 Domestic. -3 Well-behaved; दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् Bhāg. 3. 24. 1.

**शालिनी** 1 A mistress of the house, housewife. -2 N. of a metre.

**शालीन** *a*. [ शालाप्रवेशमर्हति, शाला-ख ] 1 Modest, bashful, shy, retiring; निसर्गशालीनः स्त्रीजनः M. 4; शशाक शालीनतया न वक्तुम् R. 6. 81; 18. 17; Śi. 16. 83. -2 Like, resembling. **-नः** A householder. ( शालीनीकृ 'to make humble, humiliate'.) **-नम्** 1 Bashfulness, modesty. -2 Taking alms without begging (अयाचितवृत्ति); वार्ता सञ्चयशालीनशिलोञ्छ इति वै गृहे Bhāg. 3. 12. 42.

**शालीनता, -त्वम्** Bashfulness, modesty.

**शालीनीकरणम्** 1 Humiliation; P. I. 3. 70. -2 Abuse, reproach.

**शालीय** *a*. Belonging to a house or school.

**शाली** (from श्याली) A wife's sister.

**शालुः** [ शाल्-उण् ] 1 A frog. -2 A kind of perfume. -3 A kind of astringent substance. **-लु** *n*. The root of the water-lily.

**शालु (लू) कम्** [ शल्-ऊकण् Uṇ. 4. 44 ] 1 The root of the water-lily. -2 Nutmeg. **-कः** 1 A frog. -2 The root of the water-lily ( शालूक only in this sense ).

**शालु (लू) रः** A frog.

**शालूरकः** A kind of worm infesting the intestines.